भूतेशः, पुं, ( भूतानां प्राण्यादीनां प्रमथादीनां बालग्रहाणाञ्च ईशः । ) शिवः । इत्यमरः । १ । १ । ३३ ॥ ( यथा, राजतरङ्गिण्याम् । १ । १०७ ।
"म्लेच्छैः सञ्छादिते देशे स तदुच्छित्तये नृपः । तपः सन्तोषिताल्लेभे भूतेशात् सुकृती सुतम् ॥")

भूत्तमं, क्ली, ( भुवि उत्तमम् । ) सुवर्णम् । इति हेमचन्द्रः । ४ । १० ॥

भूदरीभवा, स्त्री, (भूदर्य्यां भूविले भवतीति । भू + अच् । टाप् ।) आखुपर्णी । इति भावप्रकाशः ॥

भूदारः, पुं, ( भुवं दारयतीति । दॄ + कर्म्मण्यण् । ३ । २ । १ । इत्यण् । ) शूकरः । इत्यमरः । २ । ५ । २ ॥

भूदेवः, पुं, ( भुवो भुवि वा देवः । ) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥

भूधनः, पुं, राजा । भूरेव धनं यस्य सः । इति केचित् ॥

भूधरः, पुं, ( धरतीति । धृ + पचाद्यच् । भुवां धरः इति षष्ठीसमासः । ) पर्व्वतः । इति हेमचन्द्रः ॥ ( यथा, मार्कण्डेयपुराणे । ५७ । ११ ।
"तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥")
यन्त्रभेदः । यथा,—
"जलकच्छपपातालदोलाभूधरवालुकाः ।
चक्राद्या यन्त्रभेदाः स्युर्वैद्यान्यान्याश्च मूषकाः ॥"
इति शब्दचन्द्रिका ।
( यथाचास्य व्यवहारः ।
"द्विपलं शुद्धसूतस्य सूतार्द्धं गन्धकन्तथा ।
कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम् ॥
बद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वरमारणाधिकारे ॥
शिवः । यथा, महाभारते ।१३।१४।१५९।
"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ॥"
कृष्णः । यथा, भागवते । ३ । १३ । ४० ।
"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर ! भूः सभूधरा ।
यथा वनान्निःसरतो दता धृता
मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥")

भूधात्री, स्त्री, ( भूलग्ना धात्री । ) भूम्यामलकी । इति राजनिर्घण्टः ॥ ( यथास्य गुणाः ।
"भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफकण्डूक्षतापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वटुकभैरवः । इति विश्वसारतन्त्रे तस्य शतनामस्तोत्रम् ॥

भूध्रः, पुं, (भुवं धरतीति । धृ + मूलविभुजादित्वात् । ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः । ) पर्व्वतः । इति हेमचन्द्रः । ४ । ९३ ॥

भूनागः, पुं, उपरसविशेषः । तत्पर्य्यायः । चितिनागः २ भूजन्तुः ३ रक्तजन्तुकः ४ चितिजः ५ चितिजन्तुः ६ रक्ततुण्डकः ७ । अस्य गुणाः । वङ्गमारकत्वम् । नानाविज्ञानकारकत्वम् । रसजारणत्वम् । सत्त्वस्य विषापहत्वञ्च । इति राजनिर्घण्टः ॥

भूनिम्बः, पुं, क्षुपविशेषः । चिराता इति भाषा । (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ।
"मधूकभूनिम्बहरिद्रिका इति समभागाः कल्कः स्यात् ।")
तत्पर्य्यायः । अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किराततिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८ । इति राजनिर्घण्टः ॥ कटुतिक्तः ९ । इति भावप्रकाशः ॥ (तथा चास्य पर्य्यायान्तरम् । वैद्यकरत्नमालायाम् ।
"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः ॥")
अस्य गुणाः । वातिकत्वम् । तिक्तत्वम् । कफपित्तज्वरापहत्वम् । व्रणसंरोपणत्वम् । पथ्यत्वम् । कुष्ठकण्डूतिशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"किरातकोऽन्यो नेपालः सोऽर्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ॥"
इति भावप्रकाशः ॥
अस्य गुणपर्य्यायान्तरे किराततिक्तशब्दे द्रष्टव्ये ॥

भूनीपः, पुं, ( भूमिलग्नो नीपः । शाकपार्थिवादिवत् समासः । ) भूमिकदम्बः । इति राजनिर्घण्टः ॥

भूनेता, [ऋ] पुं, ( भुवो नेता नायकः । ) राजा । इति केचित् ॥

भूपः, पुं, ( भुवं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ) राजा । इत्यमरः । २ । ८ । १ ॥ अर्थलोभेन प्रजादण्डकरणे तस्य पापं यथा ।
"अर्थलोभेन यो भूपः प्रजादण्डं करोति च ।
वृश्चिकानाञ्च कुण्डे स तल्लोमाब्दं वसेद्ध्रुवम् ॥
ततो वृश्चिकजातिश्च सप्तजन्मसु भारते ।
ततो नरश्चाङ्गहीनो व्याधी शुद्धो भवेन्नरः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

भूपतिः, पुं, ( भुवः पतिः । ) वटुकभैरवः । यथा,
"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः ।"
इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम् ॥
राजा । यथा,—
भूपुत्त्री यस्य पत्नी स तु भवति कथं भूपती रामचन्द्रः ।
इति रामायणे कैकयीवाक्यम् ॥
ऋषभौषधम् । इति राजनिर्घण्टः ॥

भूपदः, पुं, ( भुवि पदानि मूलान्यस्य । ) वृक्षः । इति शब्दचन्द्रिका ।

भूपदी, स्त्री, ( भुवि पदं यस्याः । गौरादित्वात् ङीष् । ) मल्लिका । इत्यमरः । २ । ४ । ७० ॥ ( यथास्याः पर्य्यायः ।
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूपलाशः, पुं, ( भुवि पलाशमस्य । ) वृक्षभेदः । शिशाली इति भाषा । यथा,—
"अश्मोड्कः शुकवृक्षश्च भूपलाशो विशल्यकृत् ।"
इति रत्नमाला ॥

भूपाटली, स्त्री, ( भुवि जाता पाटलीव । ) वृक्षविशेषः । भूयातानि इति लेनवादवी इति च हिन्दीभाषा । तत्पर्य्यायः । भूकुम्भी २ भूतालो ३ रक्तपुष्पिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । पारदे प्रयोजकत्वञ्च । इति राजनिर्घण्टः ॥

भूपालः, पुं, ( भुवं पालयतीति । पालि रक्षणे + "कर्म्मण्यण् । ३ । २ । १ । इत्यण् । ) राजा । इति शब्दमाला ॥ ( यथा, मार्कण्डेये ।१८।३।
"यदर्थं गृह्यते शुल्कं तदनिष्पादयन् वृथा ।
पण्यानां द्वादशं भागं भूपालाय वणिग्जनः ॥"
सोमपालस्य पुत्त्रः । यथा, राजतरङ्गिण्याम् । ८ । ३४९५ ।
"सोमपालात्मजो भूभृद् भूपालः प्राकृतस्तथा ॥")

भूपुत्त्री, स्त्री, ( भुवः पुत्त्री । ) सीता । इति शब्दरत्नावली ॥ [रामचन्द्रः ॥"
( "भूपुत्त्री यस्य पत्नी स भवतु कथं भूपती
इति रामायणम् ॥)

भूपेष्टः, पुं, ( भूपानामिष्टः । ) राजादनीवृक्षः । इति राजनिर्घण्टः ॥

भूभर्त्ता, [ऋ] पुं, ( भुवो भर्त्ता । "याजकादिभिश्च ।" २ । २ । ९ । इति षष्ठीसमासः । ) पृथिवीपतिः । इति सिद्धान्तकौमुद्यां तत्पुरुषसमासः ॥ ( यथा, राजतरङ्गिण्याम् ।३।२९१।
"तस्मिन्नहनि भूभर्त्ता शोकाग्निःश्वसतानिशम् ॥")

भूभुक्, [ज्] पुं, ( भुवं भुनक्ति पालयतीति । भुज् + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् । ) राजा । इति जटाधरः ॥ ( यथा, कामन्दकीयनीतिसारे । ४ । ६१ ।
"सापसाराणि दुर्गाणि भुवः सारूपजाङ्गलाः ।
निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छताम् ॥")

भूभृत्, पुं, (भुवं बिभर्त्तीति । भृ + क्विप् । "ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ । इति तुगागमश्च । ) राजा । ( यथा, रघौ । ११ । ८१ ।
"तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम् ।
निष्प्रभश्च रिपुरास भूभृताम्
धूमशेष इव धूमकेतनः ॥")
पर्व्वतः । इति मेदिनी । ते, १४० ॥ ( यथा, कुमारसम्भवे । ६ । १ ।
"अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम् ।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥")

भूमयी, स्त्री, ( भू + मयट् + ङीप् । ) छाया । सा तु सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ मृदात्मके, त्रि ॥